International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(6): 206-208
© 2017 IJSR
www.anantaajournal.com
Received: 06-09-2017
Accepted: 07-10-2017

**Dr.Prasad Gokhale**
Assistant Professor,
Department of Vedang Jyotish,
Kavikulaguru Kalidas Sanskrit
Vishwavidyalaya, Nagpur, India

**Correspondence**
**Dr.Prasad Gokhale**
Assistant Professor,
Department of Vedang Jyotish,
Kavikulaguru Kalidas Sanskrit
Vishwavidyalaya, Nagpur, India

# पाराशरीयं व्यक्तित्वनिरूपणम्

**Dr. Prasad Gokhale**

व्यक्तित्वे परम्परानुबन्धि-चिन्तनसंवेदन-प्रयत्नसंज्ञकमनोव्यापारत्रयं तदङ्गत्वेनानुप्रविशति। व्यक्तित्वाङ्गभूतघटकानां सङ्घटनेन अनुपातशो विद्यमानतया, मृदुमध्यमातिशयमात्राभेदेन, अभिव्यञ्जना प्रकारविशेषेण च व्यक्तीनां व्यक्तित्वभेदा अभिनिर्वर्तन्ते। तद्यथा बृहत्पराशरहोराशास्त्रे सत्त्वादिगुणभेदेन व्यक्तित्व निरूपणम्। बृहत्पराशरहोराशास्त्रे सत्त्वादिगुणफलाध्याये ७८ तमे अध्याये व्यक्तित्वमेवं निरूपितमस्ति। तद्यथा -
पराशर उवाच - हे विप्र! अथेदानीं ग्रहाणां सत्त्व-रजस्-तम-गुणानामाधारेण फल- निर्णयं कथयामि - इत्युक्त्वा सम्यक् व्यक्तित्वनिरूपणक्रमे ब्रूते। तद्यथा - यदा सत्त्वगुणयुक्त-ग्रहाणां प्राबल्ये सति उत्पन्नः जातकः सत्त्वगुणोपेतः सुन्दरः बुद्धिमान् च भवति। रजोगुणाधिक्ये जातो रजोगुणसमन्वितः विद्वान् भवति। तमोगुणाधिक्ये सति जातः तमोगुणसमन्वितः विवेक-शून्यश्च भवति। त्रयाणां गुणानां साम्यत्वे सति जातस्याऽपि फलं निगदति। तद्यथा - सः जनः मिश्रगुणोपेतः मध्यबुद्धियुतश्च भवति। एवं प्रकारेण उत्तम-मध्यम-अधम-उदासीनश्च भेद- चतुष्टयेन मानवाः भुवि सम्भवन्तीति निरूप्यते पराशरेण। तथा हि -

अथो गुणवशेनाहं कथयामि फलं द्विजः।
सत्त्वग्रहोदये जातो भवेत् सत्त्वाधिकः सुधीः।।
रजः खेटोदये विज्ञो रजोगुणसमन्वितः।
तमः खेटोदये मूर्खो भवेज्जातस्तमोऽधिकः।।
गुणसाम्ययुतो जातो गुणसाम्यखगोदये।
एवं चतुर्विधा विप्र जायन्ते जन्तवो भुवि।।
उत्तमो मध्यमो नीच उदासीन इति क्रमात्।
तेषां गुणानहं वक्ष्ये नारदादि-प्रभाषितान्।। (बृ.हो.शा.७८.१-४) इति।

उपक्रमेऽस्मिन् भगवद्गीतायां गुणत्रयविभागो नाम चतुर्दशाध्यायेऽपि स्वभावस्य त्रेधा वर्गीकरणम् कृतमिति दृष्टिपथमायाति।

**सात्त्विकव्यक्तित्वलक्षणम्**
एवं सात्त्विकव्यक्तित्वे इन्द्रियनिग्रहः, सारल्यमार्जवम्, तपः, कर्तव्यनिष्ठा, क्षमा, अलोभः, निःस्पृहा, ज्ञानम्, तापसः, सत्यवादित्वादयो गुणविशेषाश्च समाविष्टाः भवन्ति। एतादृशाः गुणविशिष्टाः पुरुषाः उत्तमव्यक्तित्वसम्पन्नाः भवन्तीत्यपि चिन्तनीयाः। तथा चोक्तं पराशरेण -

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
अलोभः सत्यवादित्वं जने सत्त्वाधिके गुणाः।। (बृ.हो.शा.७८.५)

**राजसव्यक्तित्वलक्षणम्**
राजसव्यक्तित्वे हि दक्षः धृतिमान्, आत्मप्रदर्शनम्, क्रियानुरागः, तेजस्वी, सतां शरण्यः, समरेष्वपराङ्मुखः, स्वार्थे सर्वसमारम्भोपक्रम इत्यादयो विशेषा अन्तर्भवन्ति। एतादृशाः गुण- विशिष्टाः पुरुषाः मध्यमव्यक्तित्वसम्पन्नाः भवन्ति। तथा चोक्तं पराशरेण -

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाऽप्यपलायनम्।
साधूनां रक्षणं चेति गुणा ज्ञेया रजोऽधिके।। (बृ.हो.शा.७८.६)

**तामसव्यक्तित्वलक्षणम्-** तामसव्यक्तित्वे हि लुब्धः, मिथ्याभिभाषी, मूर्खः, दीर्घसूत्री, अलसः, सेवायां निपुणः, शुद्धाशुद्धधर्माधर्मविवेकशाली, अशौचमित्यादिगुणानामन्तर्भावश्च इष्यते। उपर्युक्ताः गुण- विशेषाः पुरुषाः अधमव्यक्तित्वसम्पन्नाः भवन्ति। तथा चोक्तं पराशरेण -

लोभश्चासत्यवादित्वं जाड्यमालस्यमेव च।
सेवाकर्मपटुत्वञ्च गुणा एते तमोऽधिके।। (बृ.हो.शा.७८.७)

**मिश्रितव्यक्तित्वलक्षणम्**

मिश्रितव्यक्तित्वगुणसम्पन्नः पुरुषः कृषिकर्मणि, वाणिज्ये, पशुपालने, सत्यभाषणे च पाटवं सम्पादयति। एतादृशाः गुणविशेषाः पुरुषाः, उदासीनव्यक्तित्वसम्पन्नाः भवन्ति। तथा चोक्तं पराशरेण -

कृषिकर्मणि वाणिज्ये पटुत्वं पशुपालने।
सत्यासत्यप्रभाषित्यं गुणसाम्ये गुणा इमे।। (बृ.हो.शा.७८.८)

पूर्वोक्तलक्षणानि सम्यक् संलक्ष्य तत्कर्मणि यस्य यादृशं स्वभावो दरीदृश्यते तादृश कर्मणि तस्य तस्य नियोजनं कुर्यादिति स्वभावानुसारेण कर्मविभागः पराशरेण प्रतिपादितः इत्यपि न विस्मर्तव्यो विषयः। तथा चोक्तं पराशरेण -
एतैश्च लक्षणैर्लक्ष्य उत्तमो मध्यमोऽधमः।

उदासीनश्च विप्रेन्द्र तं तत्कर्मणि योजयेत्।।
द्वाभ्यामेकोऽधिको यश्च तस्याधिक्यं निगद्यते।
अन्यथा गुणसाम्यं च विज्ञेयं द्विजसत्तम।। (बृ.हो.शा.७८.९-१०)

उपक्रमेऽस्मिन् गुणप्रतिपादनस्य वैशिष्ट्यमपि ब्रवीति -

सेव्य-सेवकयोरेवं कन्यका-वरयोरपि।
गुणैः सदृशयोरेव प्रीतिर्भवति निश्चला।।
उदासीनोऽधमस्यैवमुदासीनस्य मध्यमः।
मध्यमस्योत्तमो विप्र प्रभवत्याश्रयो मुदे।।
चतुर्थाऽवयवास्तस्य स्वगुणैश्च चतुर्विधः।
जायन्ते ह्युत्तमो मध्य उदासीनोऽधमः क्रमात्।।
उत्तमे तूत्तमो जन्तुर्मध्यमेऽङ्ग च मध्यमः।
उदासीने ह्युदासीनो जायते चाऽधमेऽधमः।।
(बृ.हो.शा.७८.११,१२,१८,१९)

**पञ्चभूताधारेण व्यक्तित्वनिरूपणम्**

तत्रैव पञ्चभूतानाम् आधारेणाऽपि व्यक्तित्वनिरूपणप्रसङ्गः अद्वितीयं स्थानं भजते। एवञ्च बृहत्पाराशरहोराशास्त्रे पञ्चमहाभूतफलाध्याये ७७ तमे अध्याये जन्मकालिकग्रहाणां बलाबला-नुसारेण व्यक्तित्वनिरूपणक्रमोऽपि विशिष्य चिन्तनीयः। तद्यथा - जन्मसमये गोचरकाले वा यदि मङ्गलग्रहः वीर्ययुतो भवति तर्हि अग्निस्वभावयुतः, गुरुः सबलश्च भवति चेत् आकाश-स्वभावयुतः, शुक्रः सबलो भवति चेत् जलस्वभावयुतः, शनिः सबलः भवति चेत् वातस्वभाव युतः मिश्रैर्मिश्रस्वभावयुतश्च नरो जायते। उक्तञ्च -

सबले मङ्गले वह्निस्वभावो जायते नरः।
बुधे महीस्वभावः स्यादाकाशप्रकृतिर्गुरौ।।
शुक्रे जलस्वभावश्च मारुतप्रकृतिः शनौ।
मिश्रैर्मिश्रस्वभावश्च विज्ञेयो द्विजसत्तम।।
सूर्ये वह्निस्वभावश्च जलप्रकृतिको विधौ।
स्वदशायां ग्रहश्छायां व्यञ्जयन्ति स्वभूतजाम्।।
(बृ.हो.शा.७७.३-५)

**वह्निस्वभावयुतस्य व्यक्तेः लक्षणम्**

वह्निस्वभावयुक्तपुरुषः क्षुधार्तः, चञ्चलः, मानी, शूरः, कृशः, मनीषी, गौरङ्गः, तीक्ष्णश्च भवति। उक्तञ्च -

क्षुदार्त्तश्चपलः शूरः कृशः प्राज्ञोऽतिभक्षणः।
तीक्ष्णो गौरतनुर्मानी वह्निप्रकृतिको नरः।। (बृ.हो.शा.७७.६) इति।

**भूप्रकृतियुतस्य व्यक्तेः लक्षणम्**

भूमिस्वभावयुतः पुरुषः पद्मकर्पूरसुरभियुतः, भोगी, स्थिरसुखी, बली, क्षमावान्, सिंहनादश्च भवति। उक्तञ्च -

कर्पूरोत्पलगन्धाढ्यो भोगी स्थिरसुखी बली।
क्षमावान् सिंहनादश्च महीप्रकृतिको नरः।। (बृ.हो.शा.७७.७)

**आकाशस्वभावयुतस्य व्यक्तेः लक्षणम्**

आकाशस्वभावयुतः पुरुषः शब्दार्थवित्, नीतिज्ञः, विज्ञः, असंवृतमुखश्च भवति। तद्यथा -

शब्दार्थवित् सुनीतिज्ञो प्रगल्भो ज्ञानसंयुतः।
विवृतास्योऽतिदीर्घश्च व्योमप्रकृतिसम्भवः।। (बृ.हो.शा.७८.८)

**जलस्वभावयुतस्य व्यक्तेः लक्षणम्**

जलस्वभावयुतः पुरुषः कान्तिमान्, भारवाहकः, प्रियभाषी, राजा, बहुमित्रयुक्तः, मृदुलः, प्रतिभावान् च भवति। उक्तञ्च -

कान्तिमान् भारवाही च प्रियवाक् पृथिवीपतिः।
बहुमित्रो मृदुर्विद्वान् जलप्रकृतिसम्भवः।। (बृ.हो.शा.७७.९)

**वायुस्वभावयुतस्य व्यक्तेः लक्षणम्**

वायुस्वभावयुतः पुरुषः दानी, क्रोधी, गौरतनुः, अटनप्रियः, दुराधर्षः, कृशाङ्गः, भूपतिश्च भवति। तद्यथा -

वायुतत्त्वाधिको दाता क्रोधी गौरोऽटनप्रियः।
भूपतिश्च दुराधर्षः कृशाङ्गो जायते जनः।। (बृ.हो.शा.७७.१०)

इत्थं पञ्चमहाभूतान् अवलम्ब्य व्यक्तित्वनिरूपणक्रमप्रतिपादनात् पश्चात् पञ्चतत्त्वानां छायापि निरूपिता। तथा हि -

स्वर्णदीप्तिः शुभा दृष्टिः सर्वकार्यार्थसिद्धिता।
विजयो धनलाभश्च वह्निभार्या प्रजायते।।
इष्टगन्धः शरीरे स्यात् सुस्निग्धनखदन्तता।
धर्मार्थसुखलाभश्च भूमिच्छाया यदा भवेत्।
सुशब्दश्रवणोद्भूतं सुखं तत्र प्रजायते।।
मृदुता स्वस्थता देहे जलच्छाया यदा भवेत्।
तदाऽऽभीष्टरसास्वादसुखं भवति देहिनः।।
मालिन्यं मूढता दैन्यं रोगाश्च पवनोद्भवाः।
तदा च शोकसन्तापौ वायुच्छाया यदा भवेत्।।
(बृ.हो.शा.७६.३-७)

**पञ्चमहापुरुषाणां व्यक्तित्वम्**

बृहत्पराशरहोराशास्त्रे पञ्चमहापुरुषलक्षणाध्याये ७६ तमे अध्याये पञ्चमहापुरुषलक्षणमेवं निरूपितमस्ति। तद्यथा –
पराशर उवाच –

अथ वक्ष्याम्यहं पञ्च–महापुरुषलक्षणम्।
स्वभोच्चगतकेन्द्रस्थैर्बलिभिश्च कुजादिभिः।।
क्रमशो रुचको भद्रो हंसो मालव्य एव च।
शशश्चैते बुधैः सर्वैर्महान्तः पुरुषाः स्मृताः।। (बृ.हो.शा.७६.१–२)

हे मैत्रेय! अथ पञ्चमहापुरुषलक्षणं निगद्यते। तद्यथा – यदि कुजादि (भौमादि) पञ्च– ताराग्रहाः सबलाः सन्तः स्वक्षेत्रस्वोच्चस्थाने विद्यमानाः लग्नात् केन्द्रस्थाः भवेयुः तर्हि क्रमशः रुचक-भद्र-हंस-मालव्य-शशश्चेति पञ्चमहापुरुषयोगाः उत्पद्यन्ते। तेषां पञ्चमहापुरुषाणां व्यक्तित्वनिरूपणं विस्तरेण वर्ण्यते। तद्यथा –

**रुचकव्यक्तेः लक्षणम्**

रुचकनामकयोगे समुत्पन्नः पुरुषः दीर्घमुखः, महोत्साही, निर्मलकान्तिमान्, महाबलः, चारुभ्रूः, नीलकेशः, संग्रामप्रियः, रक्तश्यामः, दुराधर्षः, मन्त्रज्ञः, चोरनायकः, क्रूरः, मनुष्याणां भर्ता, द्विजपूजकः, करे वीणा–वज्र–धनुः–पाशवृष–चक्रैरङ्कितः, मन्त्राभिचारादिस्वभाव–समन्वितश्च भवति। एषः विन्ध्य–सह्याद्रिप्रदेशे सप्ततिवर्षपर्यन्तं भोगं कृत्वा शस्त्रेण वह्निना वा देवलोकं याति। तथा हि –

दीर्घाननो महोत्साहो स्वच्छकान्तिर्महाबलाः।
चारुभ्रूर्नीलकेशश्च सुरुचिश्च रणप्रियः।।
रक्तश्यामोऽरिहन्ता च मन्त्रविच्चोरनायकः।
क्रूरो भर्ता मनुष्याणां क्षमाऽङ्घ्रिर्द्विजपूजकः।।
वीणावज्रधनुःपाशवृषचक्राङ्कतः करे।
मन्त्राभिचारकुशली दैर्घ्ये चैव शताङ्गुलः।।
मुखदैर्घ्यसमं मध्यं तस्य विज्ञैः प्रकीर्तितम्।
तुल्यस्तुलासहस्रेण रुचको द्विजपुङ्गवः।।
भुनक्ति विन्ध्यसह्याद्रिप्रदेशं सप्ततिं समाः।
शस्त्रेण वह्निना वापि स प्रयाति सुरालयम्।। (बृ.हो.शा.७६.३–७)

**भद्रव्यक्तेः लक्षणम्**

भद्रनामयोगे समुत्पन्नः पुरुषः सिंहसदृशप्रतिभः, पीनवक्षः, गजगतिः, आजानुभुजः, पण्डितः, चतुरः, योगवित्, सात्त्विकः, शोभनचरणः, शोभनश्मश्रुसंयुतः, कामी, अघ्रिकराम्बु मध्ये शङ्ख–गदा–चक्र–शर–कुञ्जरचिह्नैरुपेतः, शास्त्रवित्, धीरः, कृष्णाकुञ्चितकेशः, सर्वकार्येषु स्वतन्त्रः, स्वजनप्रेमी, क्षमादिगुणसमन्वितश्च भवति। एतादृशस्य महापुरुषस्य ऐश्वर्यं नित्यं मित्रजनैः भुज्यते। एषः सानन्दं परिवारेण सह शतं वर्षाणि यावत् मध्यप्रदेशं पालयन् जीवति। उक्तञ्च बृहत्पराशरे –

शार्दूलप्रतिभः पीनवक्षा गजगतिः पुमान्।
पीनाजानुभुजः प्राक्षश्चतुरस्रश्च योगवित्।।
सात्त्विकः शोभनांघ्रिश्च शोभनश्मश्रुसंयुतः।
कामी शङ्ख–गदा–चक्र–शर–कुञ्जरचिह्नकैः।।
ध्वजलाङ्गलचिह्नश्च चिह्निताङ्घ्रिकराम्बुजः।
सुनासश्शास्त्रविद् धूरः कृष्णाकुञ्चितकेशभृत्।।
स्वतन्त्रः सर्वकार्येषु स्वजनप्रीणनक्षमः।
ऐश्वर्यं भुज्यते चास्य नित्यं मित्रजनैः परैः।।
तुलया तुलितो भारप्रमितः स्त्रीसुतान्वितः।
सक्षेमो भूपतिः पाति मध्यदेशं शतं समाः।। (बृ.हो.शा.७६.८–१२)

**हंसव्यक्तेः लक्षणम्**

हंसनामकयोगे समुत्पन्नः पुरुषः हंसस्वरयुतः, गौरवर्णः, सुमुखः, उन्नतनासिकः, श्लेष्म–प्रकृतिकः, मधुपिङ्गाक्षः, रक्तवर्णनखः, प्राज्ञः, पीनगण्डस्थलः, वृत्तशिराः, सुचरणाङ्घ्रिकरः, मत्स्याऽङ्कुश–धनु–शङ्ख–कुञ्ज–खट्वाङ्कितादिचिह्नैरन्वितश्च भवति। एषः स्त्रीभोगे सर्वदा रतः सन् अपि सन्तृप्तः न भवति। एषः जलक्रीडायामुद्युक्तः सन् शताधिकवर्षाणि गङ्गायमुनयोर्मध्य देशं पालयन् अन्ते वने निधनं प्राप्नोति। उक्तञ्च –

हंसो हंसस्वरो गौरः सुमुखोन्नतनासिकः।
श्लेष्मलो मधुपिङ्गाक्षो रक्तवर्णनखः सुखी।।
पीनगण्डस्थलो वृत्तशिराः सुचरणो नृपः।
मत्स्याऽङ्कुश–धनुः–शङ्ख–कुञ्ज–खट्वाङ्ग–चिह्नकैः।।
चिह्निताङ्घ्रिकरः स्त्रीषु कामार्तो नैति तुष्टताम्।
षण्णवत्यङ्गुलो दैर्घ्ये जलक्रीडारतः सुखी।।
गङ्गायमुनयोर्मध्यदेशं पाति शतं समाः।
वनान्ते निधनं याति भुक्त्वा सर्वसुखं भुवि।।
(बृ.हो.शा.७६.१३–१६)

**मालव्यव्यक्तेः लक्षणम्**

मालव्यनामकयोगे समुत्पन्नः पुरुषः समौष्ठः, चन्द्रकान्त्यायुतः, नातिरक्ताङ्गः, न ह्रस्वो नातिदीर्घकः, स्वच्छदन्तः, हस्तिनादः, आजानुभुजादिगुणसमन्वितश्च भवति। एषः सानन्दं सप्ततिवर्षपर्यन्तं मालव्यसिन्धुदेशं च पालयन् देवलोकं याति। उक्तञ्च –

समौष्ठः कृशमध्यश्च चन्द्रकान्तिरुचिः पुमान्।
सुगन्धो नातिरक्ताङ्गो न ह्रस्वो नातिदीर्घकः।।
समस्वच्छरदो हस्तिनाद आजानुबाहुधृक्।
मुखं विश्वाङ्गुलं दैर्घ्ये विस्तारे च दशाङ्गुलम्।।
मालव्यो मालवाख्यं च देशं पाति स सिन्धुकम्।
सुखं सप्ततिवर्षान्तं भुक्त्वा याति सुरालयम्।।
(बृ.हो.शा.७६.१७–१९)

**शशव्यक्तेः लक्षणम्**

शशनामकयोगे समुत्पन्नः पुरुषः कृशोदरः, शूरः, सुजघः, मतिमान्, पररन्ध्रान्वेषकः, वनाद्रिदुर्गेषु शक्तः, चञ्चलः, धातुवादि, कराङ्घ्रि, माला वीणा मृदङ्ग शस्त्र रेखाभिरन्वितः, स्त्रीशक्तादिगुणसमन्वितः भवति। एषः सानन्दं सप्ततिवर्षं यावत् शासनं कुर्वन् देवलोकं प्राप्नोति। उक्तञ्च –

तनुद्विजमुखः शूरो नातिहस्वः कृशोदरः।
मध्ये क्षामः सुजङ्घश्च मतिमान् पररन्ध्रवित्।।
शक्तो वनाद्रिदुर्गेषु सेनानीर्दन्तुरः शशः।
चञ्चलो धातुवादी च स्त्रीशक्तोऽधनान्वितः।।
मालावीणामृदङ्गाऽस्त्र रेखाङ्कितकराङ्घ्रिकः।
भूपोऽयं वसुधा पाति जीवन् खाद्रिसमाः सुखी।।
(बृ.हो.शा.७६.२०–२२)

एवमेव अङ्गलक्षणफलाध्यायनामके ८३ तमे अध्याये हस्त–पादादीनामङ्गानां लक्षणा–नामाधारेणैव व्यक्तित्वनिरूपणं पञ्चाशीतिश्लोकैः उपनिबद्धं दृष्टिपथमायान्ति।

एवं बृहत्पराशरहोराशास्त्रे व्यक्तित्वविचारः।